Jain Education International For Private & Personal Use Only www.jainelibrary.org

[श्रीजै]न-आत्मानन्द-ग्रन्थरत्नमाला-एकषष्टितमं रत्नम् (६१)

श्रीमन्मेघप्रभाचार्यविरचितं

# धर्माभ्युदय

(सूक्तरत्नावली च)

तच्च

न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरीशशिष्य प्रवर्त्तक-श्रीमत्-
कान्तिविजयमुनिवर्यविनेयमुनिचतुरविजय शिष्येण
मुनिपुण्यविजयेन संशोधितम्।

अणहिल्लपुरपत्तनवास्तव्य-ओसवालज्ञातीय-श्रेष्ठि-
हीराचन्द्र-पुत्री-प्रसन्नबाई-द्रव्यसाहाय्येन

प्रकाशयित्री

भावनगरस्था-श्रीजैन-आत्मानन्दसभा।

वीरसंवत्-२४४४. विक्रमसंवत् १९७४.
आत्मसंवत् २२ इस्वीसन १९१८.

प्रकाशक-वल्लभदास त्रिभुवनदास गांधी सेक्रेटरी श्री जैन आत्मानन्द सभा
मुद्रक-मणिभाई मथुरभाई गुप्त धी आर्य सुधारक प्रेस रावपुरा-वडोदरा
ता. १०-४-१८.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकाशक—

वल्लभदास त्रिभुवनदास गांधी

सेक्रेटरी.

श्रीजैन आत्मानन्द सभा

भावनगर.

मुद्रक—

मॅनेजर—आर्यसुधारकप्रेस.

रावपुरा—वडोदरा.

ता. १०-४-१८.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

॥ श्रीमद्विजयानन्दसूरिभ्यो नमः ॥

पण्डितप्रकाण्डश्रीमन्मेघप्रभाचार्यविरचितं

# धर्माभ्युदयम् ।

: शक्रेण मुदाभिवन्दितपदद्वन्द्वः क्षमाभृद्वरः
क्रोधाद्युत्कटवैरिवृन्ददलनः सद्धर्मनीतिप्रियः ।
प्रोन्मीलत्समिति श्रियं जयमयीं बिभ्रद्बलैरद्भुतः
स स्ताद्वीरजिनः शुभाय भवतां श्रीमानिनो मानिनाम्॥ १॥

( नान्द्यन्ते सूत्रधारः )

**सूत्रधारः**—( सहर्षं )

विस्तीर्णेऽत्र जिनेन्द्रसद्मनि महान् यात्रोत्सवो वर्तते
यत्तत्राभिनयो मयाद्य सुधिया कार्यः प्रबन्धस्य च ।
सौभाग्योपरि मञ्जरीपरिचयः सोऽयं प्रवर्तिष्यते
यद्वा स्थास्यति रत्नवृष्टिघटना सैषा सुवर्णोपरि ॥ २ ॥

( स्वगतं ) कथमद्यापि श्रीमद्देवगुरुगुणप्रस्तावकजनकल्पपादपप्रागल्भ्यश्रीसंघसभ्याभ्यर्णमभिनेयप्रबन्धपरिज्ञानार्थमुपस्थितः सततमस्मासु सत्यापितसमीचीनवैनयिकलीलः सुशीलः शैलूषो विलम्बते ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( प्रविश्य )

**नटः**—( पत्रकमर्पयन् ) ( क ) भाव ! सब्भजणाभिप्पेयनाडयारंभपवत्तयं एयं तं पत्तयं ।

**सूत्रधारः**—( गृहीत्वा सोत्कर्षं वाचयति । )

यः सत्त्वतत्त्वप्रणयैकपात्रं संग्रामधर्मोभयसत्यसन्धः ।
यस्मिन्नसौ नायकतामुपैति सैष प्रबन्धोऽभिनयेन योज्यः ॥

यतः—

दानैकवीरा भुवि सन्ति केचिद्रणैकवीरा अपरे पुमांसः ।
तपःप्रवीरा इतरेऽत्र लोके वीरव्रती त्रिष्वपि यः स नेता ॥

( क्षणं विमृश्य सहर्षोल्लापं ) हुं ज्ञातं मार्ष ! हुं ज्ञातम् मार्ष ! निश्चितं श्रीदशार्णभद्रचरित्रशुश्रूषातरङ्गितोऽयं पारिषद्यलोकः । अहो ! अस्मदीयहृदयानन्दसंवावदूकोऽयं श्रीसंघसमादेशः । यस्मादस्माभिरपि नगरलक्ष्मीशिरःशेखरसहोदरेऽस्मिन् श्रीपार्श्वनाथजिनमन्दिरे सुविस्पष्टपिष्टदुष्टातिपुष्टकर्माष्टकाष्टाहिकापूजामहोत्सवपवित्रयात्रामभि सत्यमेषमः संवत्सरे मत्सरेन्धनग्रासस्रविकाशहुताशस्य दुरन्तदुरितव्रातशकुनिजातविनिपातपाशस्य श्रीमन्महावीरजिनेश्वरचरणतामरससेवाहेवाकिचञ्चरीकस्य निर्दलितसकलमोहमहामहीपालप्रबलबलानीकस्याहरहःप्रसृमरयशःप्रकरसौरभभरपरिव्यक्तस्य श्रीदशार्णभद्रस्य राजार्षिमूर्द्धाभिषिक्तस्य प्रबन्धाभिनयश्चिराच्चिकीर्षित आसीत् ।

---

( क ) भाव ! सभ्यजनाभिप्रेयनाटकारम्भप्रवर्तकमेतत्तत्पत्रकम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नटः**—( क ) भाव ! तुम्हाण सब्भजणचित्तवित्तीए समं च मंतिऊण एयस्स अणुरूवरूवयस्स प्परूवणारंभो ।

( नेपथ्ये )

( ख ) देव ! तुह धम्मकंदो नरिंददेविंदवड्ढियाणंदो ।
संजमसिरिसन्नाहो जयउ जयउ वीरजिणनाहो ॥ ५ ॥
दुट्ठदुरिए समंतो तंताण नराण मग्गमक्खंतो ।
भावरससिद्धिहेऊ वीरजिणो कुणउ कल्लाणं ॥ ६ ॥

( " देव ! तुह धम्मकंदो " इत्यादि पुनरपि । )

**सूत्रधारः**—( ससंभ्रममिवाकर्ण्य नटं प्रति ) सुशील ! प्रगुणीबभूव श्रीदशार्णभद्रभूमीपतिभूमिकावाही अस्मदन्तेवासी प्रियङ्करो नाम । तत्पुरस्तात्पठतः सुमङ्गलाभिधमङ्गलपाठकस्येदं ध्रुवास्थानीयं कल्याणगाथायुगलमिव श्रूयते । विज्ञजनमनोहरोक्तिश्रवणसावधाने राज्ञि पुनः पुनस्तदेव पठति । तथा 'भावरससिद्धिहेऊ' इत्यनेन पदेन भावस्य मल्लक्षणस्य सूत्रधारस्य रसानां शृङ्गारादीनाम्, इह हि सुरूपरूपकप्ररूपणप्रक्रम-

---

( क ) भाव ! युष्माकं सभ्यजनचित्तवृत्त्या समं च मन्त्रयित्वैतस्यानुरूपरूपकस्य प्ररूपणारम्भः ।

( ख ) देव ! तव धर्मकन्दो नरेन्द्रदेवेन्द्रवर्धितानन्दः ।
संयमश्रीसन्नाहो जयतु जयतु वीरजिननाथः ॥
दुष्टदुरितान् शमयन् तान्तेभ्यो नरेभ्यो मार्गमाख्यन् ।
भावरससिद्धिहेतुर्वीरजिनः करोतु कल्याणम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुचितानां सिद्धिहेतुत्वं प्रतिपादयता कुशलवैतालिकेनानेन दिष्ट्या ममापि शुभोपश्रुतिलाभ इव श्रवणपथप्रणयीकृतः। तदेहि आवामप्यनन्तरकार्यकरणाय सज्जीभवावः ।

( इति निष्क्रान्तौ । )

## ॥ प्रस्तावना ॥

( ततः प्रविशति निजप्रासादसभामण्डपस्थसिंहासनाध्यासीनत्रिदशाङ्गनानुकारवारविलासिनीकरकमलसंचार्यमाणचारुतरचामरयुगलवीज्यमानो राजा दशार्णभद्रो विभवतश्च परिवारः । )

**राजा**—( सुमतिनामानं निजममात्यरत्नं प्रति ) महत्तम !

कदा मुदाश्रुभिः प्लाव्यो मिथ्यादर्शनकश्मलः।
देवदेवं नमस्कृत्य वीरं मम शुभोदये ? ॥ ७ ॥

**अमात्यः**—देव ! एवमेतत्,

चिन्तारत्नं कल्पद्रुमश्च सौवर्णपुरुषसिद्धिश्च ।
जिनवन्दनं सुभक्त्या पृथुपुण्यैर्भवति कस्यापि ॥ ८ ॥

**राजा**—

पुण्यप्रबन्धसुलभांह्रिसरोरुहस्य
तस्यागमात्समभिनन्दति मां जनो यः ।
तस्मै सुवर्णरसनादिकतोषदानं
किं किं ददामि नहि कामितवस्तु यद्वा ? ॥ ९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अमात्यः**—देव !

अन्योऽपि कोऽपि विफलो न भवति परितोष्य देवकीयमनः ।
श्रीवीरागमकथनात्तोषयिता किमुत यस्तस्य ? ॥ १० ॥

( ततः प्रविशति प्रकृत्या सदाचारः पुरुषोत्तमो नाम प्रतीहारः । )

**प्रतीहारः**—( राजानं प्रति ) देव ! देवकीयोद्यानस्योद्यानपालकः प्रियंवदः कुतोऽपि निष्यन्दमान इवामन्दानन्दरसेन देवदर्शनमिच्छुः सिंहद्वारमधितिष्ठति ।

**राजा**—( साक्षेपं ) अकालक्षेपमेव प्रवेशय ।

**प्रतीहारः**—यदादिशति देवः । ( इति निष्क्रम्य प्रियंवदेन समं प्रविशति । )

**प्रियंवदः**—( क ) जयदु जयदु देवो । ( इति राजानं प्रणम्य विज्ञपयति । ) देव ! पणयजणकल्लाणकंदुट्टविसट्टणुग्गंतमिहराणुगारिणो सिरिवद्धमाणसामिणो समागमणमंगलेण वद्धाविज्जदु देवो ।

**राजा**—( समाकर्ण्यानन्दरोमाञ्चमभिनीय ) प्रियंवदक ! त्रिभुवनजनसंस्तूयमानपदपङ्केरुहमहिमा निष्प्रतिमनैर्मल्यकैवल्यलक्ष्मीविलासरसप्रसृतः समवसृतः कस्मिन्नगण्यपुण्यसंभारसुभगम्भावुके भूभागे भगवान् ? ।

---

( क ) जयतु जयतु देवः । देव ! प्रणतजनकल्याणनीलोत्पलदलनोद्गतमिहरानुकारिणः श्रीवर्धमानस्वामिनः समागमनमङ्गलेन वर्धाप्यतां देवः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रियंवदः**—( क ) देव ! एयस्सेय धरणिरमणीभालयलतिलयालंकारसहयरस्स दसन्नपुरनयरस्स मणोरमुज्जाणमज्झम्मि उज्जाणसिरीसीसामेलस्स केलिसेलस्स रयणमयचूडस्स दसन्नकूडस्स मणहरसिरम्मि सुरविरइयतियलुक्कचमक्कारकरणसमवसरणसंठिओ अमरनरसहाए सेविज्जमाणो चिट्ठइ।

( नेपथ्ये तुमुलकोमलो ध्वनिः । )

**राजा**—( सविस्मयमाकर्ण्य पुरुषमेकं प्रति ) भद्रमुख ! ज्ञायतां किमेतत् ? ।

**पुरुषः**—( ख ) जं देवो आणवेदि । ( इति निष्क्रम्य पुनः प्रविश्य च ) देव ! जहाविन्नत्तं य्येव उज्जाणवालगेण । एसो खु वीरजिणिंदवंदणत्थमागयाणं सग्गोकसाणं मणुस्साणं च जयजयसद्दतिलइओ मंगलज्झुणी ।

( ततः प्रविशति यथाकथितस्थानसमवसरणव्यवस्थितो भगवान् त्रिदशासुरविद्याधरपरिच्छदश्च । )

**राजा**—( सविशेषोत्कण्ठमङ्गलग्नमाभरणं सौवर्णरसनासनाथं प्रसाददानेन प्रियंवदकाय प्रयच्छति । ससंभ्रमं सिंहासनादुत्थाय

( क ) देव ! एतस्यैव धरणीरमणीभालतलतिलकालङ्कारसहचरस्य दशार्णपुरनगरस्य मनोरमोद्यानमध्ये उद्यानश्रीशीर्षापीडस्य केलिशैलस्य रत्नमयचूडस्य दशार्णकूटस्य मनोहरशिरसि सुरविरचितत्रैलोक्यचमत्कारकरणसमवसरणसंस्थितोऽमरनरसभया सेव्यमानस्तिष्ठति ।

( ख ) यद्देव आज्ञापयति । देव ! यथाविज्ञप्तमेवोद्यानपालकेन । एष खलु वीरजिनेन्द्रवन्दनार्थमागतानां स्वर्गौकसां मनुष्याणां च जयजयशब्दतिलकितो मङ्गलध्वनिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सभाभ्यन्तर एव भगवदभिमुखं पञ्च सप्त पदानि गत्वा समायोजितकरकुड्मलः शिरसा त्रिकृत्वः समाश्लिष्टभूमण्डलः )

जय जय वीरजिनेश्वर ! दिनकरकरनिकर ! मोहतिमिरस्य ।
भक्त्या त्वदंह्रिकमलं वन्देऽहमिहस्थितस्तावत् ॥ ११ ॥

( एवंप्रकारनमस्कारसमुद्गारसारं भगवन्तं नमस्कृत्य
पुनः सिंहासनमध्यास्य स्वगतं )

प्राज्यं राज्यमिदं मदीयमभितो निःशेषभूमीभुजां
मध्ये कोऽस्ति समो मम क्षितितले शक्त्या च भक्त्या प्रभौ ?।

( ततश्च प्रकाशममात्यं प्रति ) अमात्य !

नो केनाप्यभिवन्दितोऽद्भुततरस्फीत्या न वन्दिष्यते
यद्वा कोऽपि यथा तथाद्य मयका वन्द्यः स तीर्थाधिपः ॥

तत्सर्वथा सांप्रतमेकहेलया सपरिवारः परिकलितस्फारतरशृङ्गारसारः सविशेषविभूषितकरितुरगरथादिपत्रप्रचारः कार्यतां नागरिकसैनिकजनवर्गः समग्रः। अचिरादेव रचय जगदाश्चर्यकारिणीं सर्वसामग्रीम् ।

अमात्यः—यदादिशति देवः। ( इति निष्क्रम्य पुनः प्रविश्य ) देव ! एकमुत्साहिताः, अपरं मयूरेण लपितम् । एकमिष्टं द्वितीयं वैद्योपदिष्टम् । देवाधिदेवं श्रीमन्महावीरमभिवन्दितुं स्वत एव समुद्भूतप्रभूतानन्दस्ताण्डविताघोषणापटहपटुप्रणादकृतानुप्रवेशेन विशेषतो देवादेशेन द्विगुणितोत्साहः समन्तात्प्रगुणीभूतोऽयमस्तोकः पौरलोकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रतीहारः—सकलमण्डलेश्वरपुरःसरपरःशतसामन्ता राजाङ्गणमुपस्थिता महाराजपादावधारणं प्रतीक्षन्ते ।**

( ततः प्रविशन्ति यथानिर्दिष्टाः पौरमण्डलेश्वरादयः । )

**राजा**—( उभौ सुप्रसन्नकिञ्चिन्नयनावलोकनेनानुगृह्य पुरोऽवलोक्य च ) **अये ! अस्मभ्यमुपस्थापितो हस्तिपकलोकेन मङ्गलाभ्युदयाभिधानः पट्टकरीन्द्रोऽपि** । ( इति सिंहासनादुत्थातुमिच्छन् ) **देव ! पादावधारणं विधीयताम्** । ( इति सेवकजनप्रतिपत्तिवचांसि शृण्वन् चतुराभिधचातुर्धरिकनरकुञ्जरेण दत्तहस्तावलम्बः किञ्चित्परिक्रम्योपरिधृतसितातपवारणो महासिन्धुरकन्धराधिरोहणं नाटयति । )

( प्रस्तावमवाप्य सुमङ्गलः पठति । )

**(क) लवणिमसुद्धमुद्धमयरद्धयपयडियपवरगुणगणं**
**नहयलगमणजाणजालंतरि पिक्खिवि ईसि तुह तणुं ।**
**देव दसन्नभद्द ! सुरतरुणिहं मणु तखणि वि मुच्छए**
**तं नरनारिनियरु तुह दंसणि किवँ किवँ न जणु गच्छए ॥**

**द्वितीयः—**

**(ख) सच्चं लायन्नमयं तुह रूवं देव ! अन्नहा कह णु ।**
**सविसेसं तिसियमणो नयणेहिँ पियंतओ लोओ ? ॥१४॥**

---

(क) लवणिमशुद्धमुग्धमकरध्वजप्रकाटितप्रवरगुणगणं
नभस्तलगमनयानजालान्तरे प्रेक्ष्येषत्तव तनुम् ।
देव दशार्णभद्र ! सुरतरुणीनां मनस्तत्क्षण एव मूर्च्छते
तन्नरनारीनिकरस्तव दर्शने कथं कथं न इव गच्छति ॥

(ख) सत्यं लावण्यमयं तव रूपं देव ! अन्यथा कथं नु ।
सविशेषं तृषितमना नयनैः पिबन् लोकः ? ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( प्रचलिते च राज्ञि पुनः )

**प्रथमः**—

(क) दुद्धरतुरयसमयमयगलबलउब्भडसुहडमंडियं
इहं सहसलक्खतहरहवररविरहतलियखंडियं ।
सुजस दसन्नभद्दनरवर ! तुह जवइ हु सिन्नु चल्लए
स धर धरंतु सेसु कंपिरतणु हिरिवसि धसि न मिल्हए ॥

**पुनर्द्वितीयः शुभङ्करो नाम**—

(ख) पवणवसपरिचलन्ता लोयाणं धयवडा कहंति व्व ।
चलिओ दसन्नभद्दो पहाउ ओसरह ओसरह ॥ १६ ॥

**राजा**—( सर्वतः स्वसैन्यमवलोक्य सगर्वतया शक्रसमानमिवात्मानं मन्यमानो निजगजेन्द्रैकासनस्थममात्यं प्रति ) मन्त्रिन् ! भवाम्भोधिनिस्तारकं श्रीवीरभट्टारकं नमस्कर्तुमियति समये ननु सौधर्मेन्द्रोऽपि समागतो भविष्यति ? ।

**अमात्यः**—देव ! परमेश्वरनमस्यारसपारवश्येनानवरतमपि रोदसीविवरप्रवर्तमानगमनागमनस्य दुर्नीतिनिर्नाशनस्य संभाव्यते समागमः पाकशासनस्य ।

---

(क) दुर्धरतुरगसमदमदकलबलोद्भटसुभटमण्डितं
इह सहस्रलक्षतथारथवररावविरथत्रारितखण्डितम् ।
सुयशो दशार्णभद्रनरवर ! तव जवेन खलु सैन्यं चलति
स धरां धरञ्छेषः कम्प्रतनुः ह्रीवशेन धर्षित्वा न मुञ्चति ॥
(ख) पवनवशपरिचलन्तो लोकानां ध्वजपटाः कथयन्तीव ।
चलितो दशार्णभद्रः पथोऽपसरतापसरत ॥

( ततः प्रविशति सौधर्मस्वर्गादवतरन्नैरावणमहावारणस्कन्धमधिरूढो निजगजेन्द्रैकासनस्थशचीबृहस्पतिसहितः पुरन्दरो विविधविमानसिंहासनाश्वादियानस्थस्त्रिदशलोकपरिकरश्च । )

**पुरन्दरः**—(स्वगतं) दिष्ट्या भाग्यमद्य मम पुण्यपीयूषवृष्ट्या निखिलमङ्गलोद्याने यदेष निश्शेषभुवनानन्दनो वन्दनीयः श्रीसिद्धार्थपार्थिवनन्दनो देवः । (पुरोऽवलोक्य प्रकाशं बृहस्पतिं प्रति ) वाचस्पते ! तदेतद्दशार्णपुरपत्तनमद्यप्रातीनदिनेषु श्लाघ्यतया सकलजगतीतलनगराणामुपरि वर्त्तते । प्रवर्धमानमहिमा श्रीवर्धमानस्वामी समवसृत्य यत्परिसरं परिष्करोति । पश्यतु हि भवान् ,

भास्वत्पद्मं समवसरणं यत्र सत्पात्ररम्यं
श्रीमान् वीरः सुरभितगुणः प्रस्फुरद्बीजकोशः ।
वैमानालीश्रितसुमनसां यत्कनालं विशालं
भृङ्गायन्ते नरसुरगणा हंसशुभ्रा ध्वजाश्च ॥ १७ ॥

**बृहस्पतिः**—देव ! एवमेवैतत् । किमुच्यते भगवदागमनमनोहरस्यास्य नगरस्य ? ।

**शची**—(क) अज्जउत्त ! उत्तमजणाणं च्चेव दंसणमित्तेण वि ऊससियहिययाणं अमंदाणंदरोमंकुरप्पयरकंचुइज्जं-

(क) आर्यपुत्र ! उत्तमजनानामेव दर्शनमात्रेणापि उच्छ्वसितहृदयानाममन्दानन्दरोमाङ्कुरप्रकरकञ्चुकितगात्राणामतिप्रवणश्रवणशुक्तिभिर्भगवतः सरसधर्मदेशनामृतपानं संपद्यते ।

तगत्ताणं अइपवणसवणसुत्तीहिं भयवओ सरसधम्मदेसणामयपाणं संपज्जइ ।

पुरन्दरः—प्रिये ! एवमेतत् ।

जिनराजकिंवदन्ती वन्दितुमुत्कण्ठिता नतिरुपास्तिः ।
सद्धर्मवचःश्रवणं पुण्यैर्गुरुगुरुतरैर्भवति ॥ १८ ॥

शची—( समवसरणाभिमुखमवलोक्य ) (क) अज्जउत्त ! हीमाणहे ! सुराणं पिव विज्जाहराणं पि नराणं गयणगमणाइसत्तीओ वि प्फुरंति ।

पुरन्दरः—( सानुकम्पमिव ) प्रिये ! समाराधितप्रसन्नविद्याधिदेवताविशेषाणां दिव्यौषधप्रयोगपरिस्फुरितप्रभावोन्मेषाणां भवन्त्यमीषामपि रचितभूचराश्चर्यव्यक्तयः काश्चन शक्तयः । परं

जन्मस्वभावसंपन्नप्रभावाः क नु देवताः ? ।
किङ्कराः सुरलोकानां क च विद्याधरा नराः ? ॥१९॥

( ततः प्रविशतो भव्यजनभवाम्भोधिनिस्तरणकर्णीरथानुकरणसमवसरणोपान्तमास्थितौ प्रणयवार्तामिव कुर्वन्तौ नन्दनचन्दनौ नाम विद्याधरकुमारौ । )

नन्दनः—(चन्दनं प्रति) सखे चन्दन !

---

(क) आर्यपुत्र ! आश्चर्य सुराणामिव विद्याधराणामपि नराणां गगनगमनादिशक्तयोऽपि स्फुरन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्फूर्जन्निःस्वाननादैः पटुपटहरवैर्झल्लरीझात्कृतैस्तैः
शङ्खानां घूत्कृतौघैर्यमलपरिलसत्काहलोत्तालरावैः ।
भेरीभाङ्कारभारैर्बधिरितभुवनाभ्यन्तरो भूमिपाल-
श्चिह्नैः शार्दूलमुख्यैर्घनविकटटगैः कम्रलम्बैरलम्बैः ॥२०॥
प्रोद्यत्केतुप्रतानैः पवनवशचलैर्व्योमसंमार्जनोत्कैः
शैलोत्तुङ्गैः करीन्द्रैस्तुरगरथवरैः पत्तिभिर्भूरिलक्षैः ।
सन्मायूरातपत्रादिभिरपरिमितैरातपत्रैर्विचित्रै-
रेष प्रोद्दामलक्ष्मीः क इह जिननतिं कर्तुमभ्येति भक्त्या?॥

चन्दनः—सखे !

राजा दशार्णभद्रोऽयं राजन्यैकशिरोमणिः ।
अभ्येति श्रीमहावीरं मन्ये नन्दन ! वन्दितुम् ॥ २२ ॥

इतश्च—

एकेनापि करीन्द्रेण व्याप्तनिःशेषविष्टपः ।
शक्रः स्वर्गात्समायाति विमानाश्वादिवाहनैः ॥ २३ ॥

नन्दनः—(नभोऽभिमुखं तद्दिशं विस्मयस्मेरनेत्रतयावलोक्य) अये !

ऐरावतः कुरु रदाष्टकमत्र धेहि
वापीसरोजदलमष्टकमष्टकं च ।
प्रत्येकमेषु च दलेषु विधेहि नाट्यं
द्वात्रिंशतासितमिहास्ति किमेतदद्य ? ॥ २४ ॥

चन्दनः—सखे नन्दन ! किं न जानासि एवंप्रकारैरावणकरणकारणम् ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्दनः—नहि किमपि मया ज्ञातमस्ति । किं भवान् जानाति कमप्यत्र वृत्तान्तम् ? ।

चन्दनः—सम्यग् जानामि, सुरेश्वरपुरस्सरमित एव समागच्छता प्रियसुहृदा मणिप्रभदेवेन निवेदितं मम ।

नन्दनः—( साक्षेपं ) किं तत् ? ।

चन्दनः—अद्यैष तत्रभवान् पौलोमीपतिः संप्रति श्रीमान् सिंहलाञ्छनो जिनः समवसृतः किं क्षेत्रं पवित्रयति ? । तदेकतानज्ञानोपयोगेनात्रावस्थितं भगवन्तं विज्ञाय सानन्दस्तद्वन्दनां विधित्सुः " राज्यं प्राज्यमिदं " श्लो० १२ इत्येवं दशार्णभद्रराज्ञो गर्वावस्थामयुक्तिमतीमवबुध्य तदपनयनार्थमित्थम्भूतप्रभूतरूपनिर्मापणायैरावणं समादिदेश ।

नन्दनः—इदानीमेष दशार्णभद्रः सुरेन्द्रपराजितः किमिव विधास्यति ? ।

चन्दनः—यदुत्तमजनानां कर्तुमुचितम् । उत्तिष्ठ, आवामपि तत्र गत्वा कुतूहलमालोकयावः । ( इति तौ राजान्तिकमुपसृत्य पश्यतः । )

राजा—( निरुपमानं स्वस्य निर्नाशिताभिमानं पुरन्दरमहर्द्धिमहिमानमालोक्य विगलितच्छायः स्वगतं ) सभाभ्यन्तरे तथाभिमानमातन्वता न सुष्ठु चेष्टितं मया । ( प्रकाशं मन्त्रिणं प्रति सलज्जमिव ) अमात्य ! मन्ये मदभिमानोपमर्दनाय मनोऽध्यवसायमात्रप्रयासलीलया सुनासीरो दर्शिताहङ्कारमित्थङ्कारं मम लोचनाध्वानमवातरत् । पश्य पश्य ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रामेशः सपरीवारो यथा कोऽपि न मत्पुरः ।
अहं सराज्यराष्ट्रोऽपि पुरन्दरपुरस्तथा ॥ २५ ॥
( पुनः ससंवेगं )
गुरूणां गुरवः सन्ति महर्द्धीनां महर्द्धिकाः ।
गुणिनां गुणिनो लोके वृथा मानो हि दुर्धियाम् ॥२६॥

मन्त्री—देव मास्म विषादः क्रियतां देवपादैः ।
क्व शक्रलक्ष्मीः ? क्व च राजसंपत् ?

( राजा सविलक्षं विहस्य ' क्व शक्र–' इत्येतदेव पदं प्रकारान्तरेण साभिमानवृत्त्या चिन्तयन् पुनः पुनर्भणति । )

मन्त्री—देव ! मुच्यतां विषादः ।

राजा—
कथं मम स्यादिह शक्रदर्शनम् ? ।

मन्त्री—
केनापि राज्ञात्र पराभवो वः

राजा—
पराभवः खण्डितपुण्यकारिणाम् ॥२७॥

मन्त्री—देव ! कथङ्कारमित्थं महाराजेन मन्युभरपरवशीक्रियते स्वान्तरात्मा ? ।

कुलेन विपुलेनात्र सत्कलाकौशलेन वा ।
रूपसौन्दर्यराज्यैर्वा देवपादैः समोऽस्ति कः ? ॥२८॥

राजा—अमात्य ! पारमार्थिकोऽयं विचारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऋद्ध्या गुणसमृद्ध्या वा कोऽपि कस्यापि हीयते ।
धन्याः सद्ध्यानमासाद्य लभन्ते मुक्ततां समाम् ॥२९॥

**मन्त्री**—(स्वगतं) अहो ! देवस्य मनस्यल्पव्यतिकरेऽपि महत् पराभववैशसम् । जानाम्येनेन संविग्नमनसा व्रतमपि ग्रहीतुकामो लक्ष्यते ।

**राजा**—( स्वगतं सोपायमिव )

न यावदायाति पुरन्दरोऽयं वेगेन तावज्जिनवीरपार्श्वे ।
गृह्णामि दीक्षां कृतसाधुशिक्षां पश्चात्तथा दर्शनमस्तु तेन ॥३०॥

( इति निश्चित्य स्वचेतसि शीघ्रीकृतकरीन्द्रसंचारेण विधिवत् समवसरणं प्रविश्य श्रीमद्वीरजिनेश्वरं नमस्कुर्वन् )

एषोऽस्मि तव प्रणतो भगवन् ! शरणाय मोहभयभीतः ।
भवजलधियानपात्रं जिनेन्द्र ! मे देहि चारित्रम् ॥३१॥

( एवं विज्ञप्य व्रतं गृह्णाति । )

( यमनिकान्तराद् यतिवेषधारी पुत्रकस्तत्र स्थापनीयः । )

**मन्त्री**—( सदुःखविस्मयं चतुराभिधचातुर्वरिकप्रधानपुरुषं प्रति ) आः ! कथमेकपदे कस्यापि स्वाकूतमनिवेद्यैव देवेन दर्शनादेव देवाधिदेवस्य पादाम्बुजे प्रव्रज्यां प्रतिपद्य वयमनाथीकृताः स्मः ! ।

**चतुरः**—अमात्य ! भवन्तोऽपि संयमस्वीकारस्वकीयमनोरथं न ज्ञापिता महाराजेन ।

**अमात्यः**—न ज्ञापिताः । परं स्वत एव ज्ञातमस्माभि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राखण्डलप्रचण्डलक्ष्मीविलोकनादारभ्य नरेन्द्रस्य निजराज्यविरक्तिवचनैः ।

**चतुरः**—पश्यत सकलवसुधासमिद्धसमृद्धिपात्रं कियन्मात्रं प्रौढप्रभुत्वप्राज्यं साम्राज्यमिव राज्यं जीर्णशीर्णतृणतुलया कथङ्कारं तत्याज महाराजः ? । एवंविधं देवस्य कुसुमायुधस्य मूर्तिमदाज्ञास्वरूपं निष्प्रतिरूपमन्तःपुरमपि वैराग्यैकवित्तस्यैतदीयचित्तस्य नान्तरायं कर्तुमलम्बभूव ।

**मन्त्री**—कल्याणवानेष महापुरुषशिरोमणिः क्षणादेव निष्प्रतिमसमुल्लसितोपशमसमुद्रः । किमस्य भणिष्यते ? ।

( ततः प्रविशति शतमखाग्रसैन्यसंचारी रतिप्रीतिप्रणयिनीद्वितयसहितो देवः कुसुमशरः । )

**मदनः**—(प्रतिपन्नव्रतं दशार्णभद्रं साधिक्षेपं वीक्ष्य साहङ्कारं) क एष त्रिलोकीतलविदितपराक्रमे मयि प्रतपति मदाज्ञाभङ्गकारी ? ।

**रतिः**—(सभयं) (क) अज्जउत्त ! अज्जेव माणसहयरस्स अवयारदंसणेणं माणो तुज्झ संतियं विसयपंचउलं च सिंगारहासविलासप्पमुहपरियणो य एयस्स खमावइणो आएसेणं

---

(क) आर्यपुत्र ! अद्यैव मानसहचरस्यापकारदर्शनेन मानस्तव सत्कं विषयपञ्चकुलं च शृङ्गारहासविलासप्रमुखपरिजनश्चैतस्य क्षमापतेरादेशेन विवेकमन्त्रिणा समन्ततः सर्वाण्यपि पुरान्निष्काशितानि । एतत्सर्वमपि मम पुरतः साम्प्रतमेव बुद्धिसख्या निवेदितं तत्तवाप्युपरि संजातमत्सर एष प्रतिभासते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवेयमंतिणा समंतओ सव्वाइं वि पुराओ निकासियाइं । एयं सव्वं पि मह पुरओ संपदं य्येव बुद्धिसहीए निवेदियं ता तुज्झं पि उवरि संजायमच्छरो एस पडिहासइ ।

**मदनः**—(सकोपं)

हृदि धत्ते हरिर्लक्ष्मीमर्धनारीश्वरो हरः ।
देवा मदाज्ञां कुर्वन्ति मनुष्याणां तु का कथा ? ॥३२॥

**प्रीतिः**—(सोत्कम्पं भयमभिनीय) (क) पिययम ! एसो खु सिरिमहावीरसांनिज्झसिद्धपरमझाणमज्झसुज्झंतमाणसो सहावतेयस्सी रायरिसी । ता एयस्स दुत्तवतवसिहिसिहाए मा पयंगत्तणं पाविहिसि ।

**मदनः**—हं हं अलं तव वचनमङ्गलीलायितेन । अलं मुद्रितमुखी भव । (इति जल्पन् विनिवार्यमाणोऽपि सकलसुहृज्जनपरिजनेनाध्यारोपितकुसुममयशरासने मोहनाभिधानं शरं संधाय तस्य राजर्षेरुपस्थितमात्रस्तत्क्षणादेव सद्ध्यानपवनोद्दीपिततपोज्वलनज्वालाभिः करालितो मूर्च्छितः पृथिव्यां पतति ।)

(शोकावेशविवशीक्रियमाणहृदयः परिजनः सर्वोऽपि पर्याकुलतया जलसेकवातव्यजनादिप्रय नं करोति ।)

(तथास्थितं स्वहृदयदयितं दृष्ट्वा)

---

(क) प्रियतम ! एष खलु श्रीमहावीरसान्निध्यसिद्धपरमध्यानमध्यशुध्यमानमानसः स्वभावतेजस्वी राजर्षिः। तदेतस्य दुस्तपतपःशिखिशिखायां मा पतङ्गत्वं प्राप्स्यसि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रतिप्रीती**—(क) हा पिययम ! समग्गसोहग्गगुण-रयणभंडार ! तियलुक्कचित्तंतरचंकमंतसुकंतविक्कमचमक्कार ! कहमित्थं य्येव तं तारिसं सुपउरपोरिसं वहंतो एयावत्थं गओ सि ? । ( इति ते अपि मूर्च्छिते भवतः । )

शान्तिकजलं प्रगुणयध्वं शान्तिकजलम् । तुहिनकन्दाभिधानया दिव्यौषध्या पीयूषवर्षिण्या समालभनं कुरुध्वं समालभनम् । वारुणमन्त्रेण ज्वलनोत्तारणं विरच्यतां वारुणमन्त्रेण । विज्ञप्यतां व्यतिकरोऽयं त्रिदशाधिनाथस्य विज्ञप्यताम् । ( इति प्रयत्नपरप्रणयिदेवमनुष्यगणगन्धर्वविद्याधरकिन्नरनिकरसंभवं तुमुलरवं प्रविशन्नेव )

**पुरन्दरः**—(श्रुत्वा) किमेतत् ? । ( इति विस्मितात्मा ज्ञानोपयोगेन तपःप्रभावदुर्दशमुनिभयभीतकर्णलग्नतल्लोकनिवेदनेन च ज्ञातवृत्तान्तश्चिन्तितानन्तरकरकमलप्रणयीभूतप्रचण्डमण्डलकमण्डलुपीयूषधाराच्छटाच्छोटेन संघटितस्वास्थ्यसंपदं मदनमनुष्ठितवान् । )

( मदनः ससंभ्रमं वामदक्षिणदिशोऽवलोकयन् किञ्चित्स्मृतविस्मृतव्यतिकर इव पुरन्दरं प्रणमति । )

**पुरन्दरः**—( प्रणमन्तमेवैनं ) किमिदमुपशमद्रुमोन्मूलनमत्तमतङ्गज मकरध्वज ! ( इत्यालपन् हृदयेन गृह्णाति । )

---

(क) हा प्रियतम ! समग्रसौभाग्यगुणरत्नभाण्डागार ! त्रैलोक्यचित्तान्तरचङ्क्रम्यमाणसुकान्तविक्रमचमत्कार ! कथमित्थमेव तत्तादृशं सुप्रचुरपौरुषं वहन्नेतदवस्थां गतोऽसि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एष युवयोर्जीवितेश्वरः पुनरपि जगद्विजययात्रोपक्रमाय सज्जीबभूव । ( इति मन्त्राक्षरैरिव शनैः शनैः श्रवणपथसंचारितैः सखीजनेन संपन्नचैतन्ये रतिप्रीती अपि अभूताम् । पुरतो निजप्रेमसदनं मदनं विलोक्य कटाक्षविक्षेपादिसात्त्विकभावान्नाटयतः । )

**मदनः**—( प्रियप्रेयस्विन्यौ विलोक्य स्वगतं )

**प्राणैरर्धानुगतैर्मूर्च्छावशघूर्णितैरिमे दयिते ।**
**स्वप्रेमपरीक्षामिव प्रदत्तवत्यौ मयि तथार्ते ॥३३॥**

**पुरन्दरः**—**अयि संपूर्णचन्द्रवदन मदन ! सात्त्विकव्रतधारिणां चारित्रिणामन्यदापि मास्म संरब्धो भूः ।**

**मदनः**—( सलज्जमिव ) **यदादिशति स्वामी ।** ( इति नम्रमुखो भवति । )

**पुरन्दरः**—( स्वगतं )**अहो ! अन्तरायकर्मणा परमेश्वरवन्दनपरमानन्दे समासीदत्यपि कियदन्तरिता वयम् ? ।** ( इत्यौत्सुक्येन प्रचलन् ) **वन्दामहे दुरन्तदुष्कृतनिष्कन्दनं ज्ञातनन्दनं भगवन्तमिदानीम् ।** (इति सामानिकसुरैः सह संलपन् गत्वा परमेश्वरं नमस्करोति । )

**दृष्टोऽसि चिराज्जिनवर्धमान ! सुकृतोदयेन केनापि ।**
**भगवन्नसमशमामृतमहार्णवमनोरथशतैस्तैः ॥३४॥**

**यत्र चरति मोहतमो दिवानिशं सकलसुमनसां बोधः ।**
**जगदभिनवमित्ररुचिर्धर्माभ्युदयः स ते जयति ॥३५॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( एवं श्रीमन्महावीरदेवाधिदेवमभिवन्द्य )

**स्वामिन्! स एष एकहेलावहेलितसकलधरित्रीतलराज्यः सर्वथास्वीकृतात्यन्तस्वहितकार्यः सद्यःसंजातसुजातचारित्रश्रीस्वयंवरमहोत्सवो दशार्णभद्रराजर्षिः। एष च राजन्यावस्थायामस्य मन्त्री यथार्थनामा सुमतिः। अयं पुनरेतदीयनन्दनः सुनन्दनो नाम राज्यार्हः कुमारः। अमी पुनः सुपर्णपन्नगाद्युपलक्षणलक्षिताकाराः असुरकुमाराः। इमे च विचित्रमन्त्रौषधकरण्डकमण्डितकरा विद्याधराः। एते च भक्तिभरनिरुद्धहृदयान्तरा व्यन्तराः। अमी च विरचितश्रीवीरजिनेन्द्रपदपद्मसेवाश्चन्द्रसूर्यादिज्योतिष्कदेवाः।** ( इति हरिणेगवेषिदेवेन विज्ञापिते—)

**सर्वे**—( यथाक्रमं पुरन्दरमुपस्थाय ) **साधर्मिकशिरोमणे! देवराज! वन्दामहे।** (इति विहितप्रणामाञ्जलयो वन्दनं कुर्वन्ति।)

**इन्द्रोऽपि**—( कर्तव्यवशसमायोजितकरकुड्मलः प्रकटितयथोचितालापमीषन्नतशिरसा तान् प्रतिवन्द्य तदेकतानध्यानरससिद्धिस्थिरीकृतकायमिव तथारूपं महामुनिमवलोक्य )

**अहो! मूर्तिरहो! मूर्तिरहो! स्फूर्तिः शमश्रियः।**
**वीतरागप्रभोर्मन्ये शिष्योऽभूदेष तादृशः॥ ३६॥**

( इति व्यावर्णयन् नमस्यति। )

**सुतमां त्वां नमस्यामि कामिनं संयमश्रियः।**
**दशार्णभद्रराजर्षे! हर्षेणोत्कर्षवर्षिणा॥ ३७॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्यप्रतिज्ञस्त्वं जातो निर्जितोऽहं पुरन्दरः ।
ग्रहीतुमपि चारित्रं यन्नाहं त्वमिव क्षमः ॥३८॥

( इति जिनवन्दनप्रतिस्पर्धानिबन्धनं स्वापराधं क्षामयति । लेपमयमूर्तित्वेन प्रतिवचनं धर्मलाभमात्रमप्यलभमानः संमुखमवलोक्य मन्त्रिणं प्रति ) कथमद्यापि प्रतिप्रभावनावलोकनकन्दलितं कालुष्यमिव कलयत्येष महर्षिः ? । किं वाऽस्मदाश्रितकुसुमायुधापराधप्रतिबद्धविरोधमिव कमपि हृदये निधत्ते ? ।

मन्त्री प्रधानपरिजनश्च—स्वामिन् ! एष महात्मा गृहीतव्रत एव समशत्रुमित्रः परिणामप्रणयिप्रशमपवित्रः सकलजीवलोकवात्सल्यमधुरचरित्रः । भवन्तोऽपि प्रततप्रतिबन्धबन्धुराः साधर्मिकबान्धवाः सततमुपासकलोकस्य । मदनोऽपि नामास्य यशस्वितपस्वितपस्तेजसैव दुस्थावस्थामापादितो न पुनः प्रकोपतेजसा । केवलं दीक्षाक्षणादारभ्य केनापि साकमनाभाषमाणः समुज्ज्वलगुणकाष्ठतामास्थितः प्रतिपन्नमौनध्यान इवोपलक्ष्यते ।

पुरन्दरः—( साश्चर्यमिव सामानिकसुरान् प्रति ) पश्यत तत्कालमेव विलीनसकलमनःपरीणाममवस्थान्तरमस्य महामुनेः कियद्विधां कलाकोटिमापन्नम् ? । ( अन्यतोऽवलोक्य ) कथमद्यापि नात्र प्रस्तावे किमप्यात्मानं ज्ञापयति यथाकामरूपः क्रीडापात्रमस्माकं कुतूहलः ? ।

(ततः प्रविशति चलच्चूलिकां श्मश्रुभागं च परामृशन् कपर्दघर्घराद्याभरणः कौतुकवेषधारी यथानिर्दिष्टः पुरुषः । )

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कुतूहलः**—(क) हीही भो ! अच्चलियं अच्चलियं,
लाए दसन्ने य मुणी पभूदे वीले जिणे दंसिदभत्ति इंदे ।
पुन्नेहिं माले मलिउं च जादे हगे य एगे पुलिसे न किं पि ॥३९॥
ता इमे सव्वे वयणे तुम्हं पुलओ पल्लविज्जमाणे अत्थि ।
हगे वि चालित्तमिमं कलेमि पलं कलत्ते मम लूववंते ।
न केणचि चेअ इमं जलक्खे लोसालुणे तस्स गिलाइ ठाइ ॥४०॥
इति ।

( सर्वे जना हसन्ति । )

**पुरन्दरः**—( ईषद्विहस्य ) अलमलमियत्या वचनहेलया कुतूहल इति ।

( स्वाम्यादेशविहस्ता वेत्रहस्ता हास्यमुखरं जननिकरं स्वेच्छाव-चनवाचालं कुतूहलं च प्रतिषेधयन्ति । )

**कुतूहलः**—( सेर्ष्यमिव )
(ख) लायलायं सलिस्सामो पलं वा सुलसामिणं ।
अम्हं गिला सुलेलस्स नं एयस्स सुहागला ॥४१॥

---

(क) ही ही भोः ! आश्चर्यमाश्चर्यम्,
राजा दशार्णश्च मुनिः प्रभूतः वीरे जिने दर्शितभक्तिरिन्द्रः ।
पुण्यैर्मारो मृत्वा च जातः अहं चैकः पुरुषो न किमपि ॥
तावदिमानि सर्वाणि वचनानि यूयं पुरतः प्ररूप्यमाणाः स्थ ।
अहमपि चारित्रमिदं करोमि परं कलत्रं मम रूपवत् ।
.......................रोषारुणः तस्य गिरा तिष्ठति ॥
(ख) राजराजं सरिष्यामः परं वा सुरस्वामिनम् ।
अस्माकं गीः सुरेशस्य खल्वेतस्य सुखाकरा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( इति अन्यत्र व्रजन्निव तत्तुल्यलोकेन संबोधनं कृत्वेव स्थाप्यते । कृतमौने च सर्वजने )

पुरन्दरः—( मन्त्रिणं प्रति ) अमात्य ! सांप्रतमसाम्प्रतं भवतः कालक्षेपकरणेन । शीघ्रमेव धवलगृहं गत्वा मौहूर्तिकोत्तमप्रदत्तप्रधानमुहूर्ते राजन्यनन्दनः सुनन्दनः पृथिव्यां राजन्वतीत्वहर्षपीयूषवर्षायाभिषिच्यताम् । नरेश्वराकस्मिकव्रतग्रहणसमुत्थविरहव्यथादुःखितपद्मावतीदेवीपुरःसरान्तःपुरपरिकरो राजवल्लभलोकश्च सर्वः संबोधनीयोऽस्ति ।

अमात्यः—यदादिशति त्रिदशस्वामी । पुनरागमनवन्दनाय वन्दामहे श्रीवीरजिनेश्वरमत्रभवन्तं राजर्षिं च ।

पुरन्दरः—अयमस्माभिः प्रदीयमानः सत्यार्थप्रथमानः शत्रुञ्जयाभिधानः पुण्यवत्परिभोग्यः प्रतिहतापायः कोऽपि वस्त्राभरणसमुदायः परिगृह्यताम् ।

अमात्यः—स्वामिन् ! अनेन कृतसमग्रजगन्मङ्गलसंग्रहेण समुल्लासिश्रीबलसूदनानुग्रहेण किमपूर्णमस्माकम् ? ।

पुरन्दरः—अमात्य ! गरीयान् कल्याणप्रस्तावोऽयम् । सर्वथा न विधेय एव निषेधः । ( इति स्वहस्तेन प्रतिपन्थिनिर्मथनपथ्यं नेपथ्यं समर्पयति । )

महाननुग्रहः । ( इति गृहीत्वा अमात्यः शिरसाऽभिवन्दते । )

पुरन्दरः—अमात्य ! समारब्धबाहुबलिविजयनाट्यावलोकनकुतूहलिनः स्वर्गलोकगमनाय वयमपि समुत्सुका वर्तामहे । कथय यदस्माभिरास्मिन्नवसरे विधेयमास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमात्यः—स्वामिन्! श्रीवर्धमानस्वामिपदपद्मप्रसादेन ततमेवंविधविधीयमानस्वर्गाधीशमधुरमधुराह्लादेन च सुनन्दनदेवस्य सकलसमीहितलक्ष्मीः करकमलमलङ्करोति ।

पुरन्दरः—तथापीदमस्तु—

राजानो जनपालनोद्यततया स्फूर्जद्वजन्तां यशो
    लोकोऽप्येष विशेषधर्मनिरतः प्राप्नोतु पुण्यश्रियम् ।
सन्तः सन्तु जगत्यमोघमनसो वन्द्याः पुनस्तत्परे
    श्रीमेघप्रभतां दधज्जिनपतिः श्रेयस्तरुं सिञ्चतु ॥४२॥

॥ इति श्रीमेघप्रभाचार्यविरचितः समासोऽयं धर्माभ्युदयो नाम च्छायानाट्यप्रबन्धः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org